# READING - 11

जितेन्द्रियः सुखदुःखसमो रामो मातरं द्रष्टुं गच्छेयमिति मत्वान्तःपुरमगच्छत् । तं शोकावहवृत्तान्तं श्रुत्वा राममाता परशुच्छिन्नकदलीव पृथिव्यां पतिता । ततो बाष्पपूर्णनयना साब्रवीत् । पुत्र यदि त्वं शोकावहो न जायेथास्तर्ह्यहमप्रजा न तादृशं दुःखमनुभवेयम् । या माता पुत्रस्य पूर्णेन्दुसदृशं मुखं न पश्येत्सा कथं जीवेत् । कथमहं जीवेयमिति । तच्छ्रुत्वा सर्वे जना भृशं व्यलपन् । किंतु लक्ष्मणस्तद्भ्रातुर्दुःखं दृष्ट्वाजितक्रोधः कोपरक्तनयन इदं * वचो ऽब्रवीत् । भो भ्रातरिदं सोढुं न शक्नोमि । भवतो वनगमनं मह्यं न रोचते । श्रूयतां तावत् । आवयोर्जराहतबुद्धिः पिता नारीवशगतः किं न ब्रूयात् । भवतो ऽपराधं विना नृपस्त्वां राज्यं त्यक्त्वा वनं गच्छेरिति कथं भाषते । कः पुत्रो भार्याजितस्य पितुर्वचनं हृदये कुर्यात् । आगच्छत्वार्यः । अहं सर्वामयोध्यां तीक्ष्णशरैर्निर्जनां कुर्याम् । राजानं पितरमपि हन्तुं समर्थो ऽस्मीति । कुपितस्य भ्रातुर्वचः श्रुत्वा रामो ऽब्रवीत्तात मास्तु कोपः । पुत्रो न कदापीदृशं वाक्यं ब्रूयात् । अपि च पुरुषो न कदापि क्रोधवशं गच्छेत् । विगतक्रोधो भवितुमर्हति भवानिति । अन्ततो लक्ष्मणस्तथास्त्वित्युक्त्वा मन्युं पराजित्य यत्र यत्र त्वं गच्छेस्तत्र तत्र गच्छेयमहमपीत्युक्तवान् ॥

---

*See 19.1